स्वामीसमर्थसेवेकरी

# पुरुषसूक्तम् (संस्कृत)

हरी ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् ।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांङ् गुलम् ॥1॥

पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् ।
उतामृत त्वस्येशानो यदन्नेनातिरोहति ॥2॥

एतावानस्य महिमाऽतोज्यायाँश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥3॥

त्रिपादूर्ध्वं उदैत्पुरषः पादोऽस्येहा भवत् पुनः।
ततो ऽ विष्वङ् व्यत्क्रामत् साशनानशने अभि ॥4॥

तस्माद्विराळ जायत विराजो अधिपुरुषः।
स जातो अत्यरिच्यत पश्चाद भूमिमथो पुरः ॥5॥

यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासी दाज्यं ग्रीष्म इध्मः शरद्धविः ॥6॥

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥7॥

तस्मात् ज्ञात् सर्व हुतः सम्भृतं पृषदाज्यम् ।
पशून्ताँश्चक्रे वायव्या नारण्यान् ग्राम्याश्च ये ॥8॥

तस्माद्य ज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्मा द्य जुस्तस्माद जायत ॥9॥

तस्मादश्वा अजायन्त ये के चोभयादतः।

गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥**10**॥

यत् पुरूषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू का उरु पादा उच्चेते ॥**11**॥

ब्राह्मणोऽस्य मुखमासीद् बाहूराजन्यः कृतः।
उरु तदस्य यद्वैश्य: पद्भ्यां शूद्रो अजायत ॥**12**॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥**13**॥

नाभ्या आसी दन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् ॥**14**॥

सप्तास्यासन् परिधय स्त्रि: सप्त: समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरूषं पशुम्॥**15**॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥**16**॥

फलश्रुती (विष्णू सूक्त)

हरी ॐ अतो देवा अवन्तु नो यतो
विष्णुर्विचक्रमे पृथिव्या: सप्त धामभि: ॥**1**॥

इदं विष्णुर्विचक्रमे त्रेधानिदधेपदं
समूळहमस्य पांसुरे ॥**2**॥

त्रिणि पदा विचक्रमे विष्णुर्गोपा अदाभ्य:।
अतो धर्माणि धारयन्॥**3**॥

विष्णो: कर्माणि पश्यत यतो व्रतानी पस्पशे ।

इन्द्रस्य युज्य: सुखा ॥**4**॥

तदविष्णो: परमं पदं सदा पश्यन्ति सूरय:।
दिवीव चक्षुरा ततम् ॥**5**॥

तद्विप्रासो विपन्यवो जागृवाँस समिंधते।
विष्णोर्यत् परमं पदम् ॥**6**॥

शांती मंत्र

ॐ देवस्य त्वा सवितु: प्रसवेऽश्चिनोर्बाहुभ्यां
पूष्णो हस्ताभ्या अग्नेस्तेजसा
सूर्यस्य वर्चसे न्द्रस्येंद्रियेणाभिषिंचाभि।
बलाय श्रियै यशसेन्नाद्याय।

ॐ भुर्भव: स्व: अमृताभिषेकोऽस्तु।
शान्ति: पुष्टिस्तुष्टिश्चास्तु॥
ॐ शांति: शांति: शांति:॥